स्यात् । एवं कालकाङ्कतुल्यै रूपैरूनो यावत्तावद्वर्णो लघुक्षेत्रस्य द्वितीयो भुजोऽस्त्यतोऽसौ कालकाङ्कतुल्यैः रूपैर्युतः सन्यावत्तावन्मानं स्यात् । अत्रेष्टं यदि कालकखण्डात्मकस्य भुजस्य मानं कल्प्यते तदाऽनेन क्षेत्रफले भक्ते यत्फलं तद्यावत्तावत्खण्डात्मकस्य द्वितीयभुजस्य मानं स्यात् । अत इष्टं यावत्तावदङ्कयुतं कालकमानं स्यात् । (फलं कालकाङ्कयुतं यावत्तावन्मानं स्यात् ।) यदि त्विष्टं यावत्खण्डात्मकस्य भुजस्य मानं कल्प्यते तदा फलं कालकखण्डात्मकस्य भुजस्य मानं स्यात् । अत इष्टं कालकाङ्कयुतं यावत्तावन्मानं स्यात् । फलं यावत्तावदङ्कयुतं कालकमानं स्यादिति । अत उपपन्नमिष्टफलाभ्यां स्वेच्छया संयुतौ वर्णाङ्कौ व्यत्ययाद्वर्णयोर्माने ज्ञातव्ये इति ।

अथवाऽन्यथोपपत्तिः। भावितक्षेत्रान्तर्गतक्षेत्रस्य भुजयोर्माने अ-यवर्णौ कल्पिते दर्शनं



इह नीलको यावत्तावदङ्कतुल्यै रूपैर्युतो जातं कालकमानं नी १ रू ४ । एवं पीतकाङ्कः कालकाङ्कतुल्यै रूपैर्युतो जातं यावत्तावन्मानं पी १ रू ३ । एवं क्रमेण जाते यावत्तावत्कालकमाने पी १ रू ३ । नी १ रू ४ । आभ्यां पक्षयोरनयोः या ४ का ३ रू २
याकाभा १

यावत्तावत्कालकावुत्थाप्य जातमुपरिमपक्षे पी ४ रू १२ नी ३ रू १२ रू २ ।
द्वितीयपक्षे तु यावत्कालकयोर्वधोऽस्ति गुणनार्थं न्यासः पी १ । नी १ रू ४ गुण-
रू ३ । नी १ रू ४

जातो द्वितीयपक्षः पीनीभा १ पी ४ नी ३ रू १२ । एवं पक्षौ

पी ४ रू १२ नी ३ रू १२ रू २
पीनीभा १ पी ४ नी ३ रू १२

अथ नीलकयोः पीतकयोश्च तुल्यत्वात्समशोधनेन नाशे जातौ पक्षौ-

रू १२ रू १२ रू २
नीपीभा १ रू १२